लैङ्गी, स्त्री, लिङ्गिनी। इति राजनिर्घण्टः॥ लिङ्ग सम्बन्धिनि, त्रि॥

लोक, ऋ क दीप्तौ। इति कविकल्पद्रुमः॥ (चुरा०-पर०-अक०-सेट्।) ऋ, अलुलोकत्। क, लोकयति। इति दुर्गादासः॥

लोक, ऋ ङ ईक्षे। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) ऋ, अलुलोकत्। ङ, लोकते। विलोकयन्त्यो वपुरापुरक्ष्णां प्रकामविस्तारफलं हरिण्यः। इत्यादौ विलोकनं विलोकः पश्चात् तं करोतीति णौ साध्यम्। इति दुर्गादासः॥

लोकः, पुं, (लोक्यते इति। लोक्+घञ्।) भुवनम्। जनः। इत्यमरः॥ सप्तलोकनामानि यथा,—

"भूर्भुवः स्वर्म्महश्चैव जनश्च तप एव च।
सत्यलोकश्च सप्तैते लोकास्तु परिकीर्त्तिताः॥"

इत्यग्निपुराणम्॥

अपि च।

"भूर्लोको भुवः स्वर्लोकस्त्रैलोक्यमिदमुच्यते।
महर्ज्जनस्तपः सत्यः सप्त लोकाः प्रकीर्त्तिताः॥
भूर्लोकः पार्थिवो लोकः अन्तरीक्षं भुवः स्मृतः।
भाव्यो लोको दिवि ह्येतच्छेषादूर्द्ध्वं यथाक्रमम्॥
भूतस्याधिपतिस्तस्मिंस्ततो भूतपतिस्तु सः।
वायुर्नभसोऽधिपतिस्तेन वायुर्नभस्पतिः।
भाव्यस्य सूर्य्याधिपतिस्तेन सूर्य्यो दिवस्पतिः॥
गन्धर्व्वाप्सरसश्चैव गुह्यकाः सह राक्षसैः।
भूर्लोकवासिनः सर्व्वे अन्तरीक्षचरान् शृणु॥
मरुतः सप्तभिः स्कन्दे रुद्रास्तथैव चाश्विनौ।
आदित्या वसवः सर्व्वे तथैव च गणाङ्गनाः॥
चतुर्थे तु महर्लोके तिष्ठन्ते कल्पवासिनः।
प्रजानां पतिभिः सर्व्वैः सेव्यते पञ्चमो महान्॥
मनुः सनत्कुमाराद्या वैराजश्च सुतास्त्रयः।
षष्ठे तु संस्थिता ह्येते देवा देवविरोधकाः॥
सत्यस्तु सप्तमो लोको ह्यपुनर्भववासिनाम्।
ब्रह्मलोकः समाख्यातो ह्यप्रतीघातलक्षणः॥
महीतलात् सहस्राणि तत ऊर्द्ध्वं दिवाकरः।
दश तानि भुवे यावद्द्विगुणे द्विगुणान्तरे॥
दशयोजनकोट्यास्तु मेरूर्द्ध्वं ध्रुवः स्मृतः।
त्रयोविंशतिलक्षाणि त्रैलोक्ये शक उच्यते॥
द्विगुणेषु सहस्रेषु योजनानां शतेषु च।
लोकान्तरमथैवैकं ध्रुवादूर्द्ध्वं विधीयते॥
देवदानवगन्धर्व्वयक्षराक्षसपन्नगाः।
भूतविद्याधराश्चैव अष्टौ ते देवयोनयः॥
ते ब्रह्माण्डस्य मध्यस्थाः परतस्तमसावृतम्।
ततोऽग्निवायुराकाशं ततो भूतादिरुच्यते॥
ततो महान् प्रधानश्च प्रकृतिः पुरुषस्ततः।
पुरुषादीश्वरो ज्ञेयो यस्य शक्त्यावृतं जगत्।
शिवोमाभानुदेवानां परापरतरा मताः॥"

इति देवीपुराणे त्रैलोक्याभ्युदये ग्रहगतिर्नामाध्यायः॥ * ॥ दिक्पालानां लोका यथा,

"प्रजापतिस्तु भगवान् गुणतः प्रेक्ष्य देवताम्।
आधिपत्येषु शुक्लेषु न्ययोजयत योगवित्॥
त्रयाणामपि लोकानां देवतानां द्विजोत्तमाः।
चकार शक्रं राजानं दैत्यानां दितिपूर्व्वजम्॥
पूर्व्वस्यां कौशिको राजा दक्षिणस्यां यमो दिशि।
वरुणः पश्चिमायान्तु उत्तरस्यां सदा धनी॥" *॥

पुण्यवतां लोका यथा,—

"एवं विभज्य राज्यानि पुरा प्रोक्तानि यानि च।
लोकांश्च विदधे दिव्यान् ददावथ पृथक् पृथक्॥
कस्यचित् सूर्य्यसङ्काशान् कस्यचिद्वह्निनिर्म्मलान्।
कस्यचिद्विद्युद्विद्योतान् कस्यचिच्चन्द्रनिर्म्मलान्॥
नानावर्णान् काममयाननेकशतयोजनान्।
स तान् सुकृतिनां लोकान् पावनाय च संस्थितान्॥
भानूर्द्ध्वे ये तपस्यन्ति सौम्यास्तारागणाः सदा।
एते सुकृतिनां लोका ये प्राप्ताः पुण्यकर्म्मभिः।
ये यजन्ति मखैः पुण्यैः समाप्तवरदक्षिणैः।
स्वदारनिरता दान्ता ऋजवः सत्यवादिनः॥
दीनानुग्रहकर्त्तारो ब्रह्मण्या लोकपूजिताः।
योगयुक्ता महात्मानो यान्ति तत्र तपोज्ज्वलाः॥
सर्व्वं सहाः क्षमायुक्ता कोपिता ये तमोजिताः।
एवं नियोज्य तनयान् स्वयं लोकपितामहः।
पौष्करं ब्रह्मसदनमारुरोह प्रजापतिः॥
सर्व्वे स्वयम्भुदत्तेषु पावनेषु दिवौकसः।
रेमिरे स्वेषु लोकेषु महेन्द्रेणाभिपालिताः॥"

इति वह्निपुराणे वाराहप्रादुर्भावनामाध्यायः॥

(जनार्थे विषयोऽस्य यथा,—

"यथा लोकस्य स्वार्गादिस्तथा पुरुषस्य गर्भाधानं यथा कृतयुगमेवं बाल्यम्। यथा त्रेता तथा यौवनं यथा द्वापरस्तथा स्थाविर्य्यं यथा कलिरेवमातुर्य्यं यथा युगान्तस्तथा मरणमित्येवमनुमानेनानुक्तानामपि लोकपुरुषयोरवयवविशेषाणामग्निवेशसामान्यं विद्यात्।"

"तत्र संयोगापेक्षी लोकशब्दः षड्धातुसमुदायो हि सामान्यतः सर्व्वलोकः। तस्य हेतुरुत्पत्तिर्वृद्धिरुपप्लवो वियोगश्च तत्र हेतुरुत्पत्तिकारणं उत्पत्तिर्जन्म वृद्धिराप्यायनं उपप्लवो दुःखागमः षड्धातु विभागो वियोगः स जीवापगमः स प्राणनिरोधः स भङ्गः स लोकस्वभावः।" इति चरके शारीरस्थाने पञ्चमेऽध्याये॥

"तस्मिन् क्रिया सोऽधिष्ठानं कस्मात् लोकस्य द्वैविध्यात्। लोको हि द्विविधः स्थावरो जङ्गमश्च। द्विविधात्मक एवाग्नेयः सौम्यश्च तद्भूयस्त्वात्। पञ्चात्मको वा।" इति सुश्रुते सूत्रस्थाने प्रथमेऽध्याये॥ * ॥)

लोककान्ता, स्त्री, (लोकानां कान्ता प्रिया।) ऋद्धिनामौषधम्। इति राजनिर्घण्टः॥ (लोकप्रिये, त्रि। यथा, गो० रामायणे। २।३८।६।

"लोककान्तं प्रियं पुत्त्रं कुशचीराम्बरं वनम्।
प्रस्थितं पश्यतो मेऽद्य हृदयं किं न दीर्य्यते॥")

लोकचक्षुः, [स्] क्ली, (लोकानां चक्षुरिव।) सूर्य्यः। इति शब्दमाला॥ जनस्य लोचनञ्च॥

लोकजित्, पुं, (लोकं जितवानिति। जि+क्विप्।) बुद्धः। इत्यमरः॥ (लोकजेतरि, त्रि। यथा, शतपथब्राह्मणे। १४।४।१।३३।

"यं कामं कामयते तमागायति तद्वै तल्लोकजिदेव॥")

लोकतुषारः, पुं, (लोके तुषार इव।) कर्पूरः। इति राजनिर्घण्टः॥ (कर्पूरशब्देऽस्य गुणादिकं ज्ञातव्यम्॥)

लोकनाथः, पुं, (लोकानां नाथः।) बुद्धः। इति त्रिकाण्डशेषः॥ (यथा, राजतरङ्गिण्याम्। १। १३८।

"लोके भगवतो लोकनाथादारभ्य केचन
ये जन्तवो गतक्लेशान् बोधिसत्त्वानवेहि तान्॥")

ब्रह्मा। इति शब्दरत्नावली॥ विष्णुः। इति तस्य सहस्रनामस्तोत्रम्॥ शिवः। यथा,—

"अकिञ्चनः सन् प्रभवः स सम्पदां
स लोकनाथः पितृसद्मगोचरः।
स भीमरूपः शिव इत्युदीर्य्यते
न सन्ति याथार्थ्यविदः पिनाकिनः॥"

इति कुमारसम्भवम्॥

(तथा च महालिङ्गार्च्चनतन्त्रे शिवशतनामस्तोत्रे।

"त्रैलोक्ये लोकनाथश्च रुद्रलोके महेश्वरः॥")

वटिकौषधविशेषः। तद्यथा,—

"पारदं गन्धकञ्चैव समभागं विचूर्णयेत्।
मृताभ्रं रसतुल्यञ्च पुनस्तेनैव मर्द्दयेत्॥
रसाद्द्विगुणलौहञ्च लौहतुल्यञ्च ताम्रकम्।
भस्मवराटिकायाश्च ताम्रतस्त्रिगुणं क्षिपेत्॥
नागवल्लीदलेनैव मर्द्दयेद्यत्नतो भिषक्।
पचेद्गजपुटेनैव स्वाङ्गशीतं समुद्धरेत्॥
यकृत्प्लीहोदरहरः गुल्मश्वयथुनाशनः।
पिप्पलीमधुसंयुक्तां सगुड़ां वा हरीतकीम्॥
गोमूत्रञ्च पिबेच्चानु गुड़ं वा जीरकान्वितम्॥"

इति लोकनाथो रसः॥ इति वैद्यकरसेन्द्रसारसंग्रहे यकृत्प्लीहाधिकारे॥ *॥ लोकप्रभौ, त्रि। यथा, गो० रामायणे। २। ३३। १६।

"लोकनाथस्य रामस्य पीड़या पीड़ितं जगत्।
अपर्व्वणीव सोमस्य राहुग्रहणपीड़या॥")

लोकपालः, पुं, (लोकान् पालयतीति। पाल+णिच्+अण्।) राजा। इति हलायुधः॥ (यथा, राजतरङ्गिण्याम्। १। ३४६।

"उत्तमो लोकपालोऽयमिति लब्ध प्रशस्तिषु।
यः प्राप्तवान् विना यत्नं चक्षमे न पशुक्षयम्॥")

दिक्पालः। यथा,—

"इन्द्रो वह्निः पितृपतिर्निर्ऋतिर्वरुणोऽनिलः।
धनदः शङ्करश्चैव लोकपालाः पुरातनाः॥"

इति वह्निपुराणम्॥